श्रीगणेशायनमः॥श्रीसरस्वत्यैनमःश्रीगुरुभ्योनमः॥
श्रीरामंसपरिवारंप्रणम्यकमलाकरः॥कुर्वेसुरवाक्बो
धायसंक्षेपशास्त्रार्थनिर्णयं॥१॥तत्रतावद्दृश्यतेतुमा
सश्चपक्षश्चऋक्षंतिथिरमुच्यते॥चांद्रःसौरःसावनो
क्षत्रोबार्हस्पत्यइति॥तदुक्तंमाधवाचार्यैः॥अहःपंच
विधंश्रौक्तव्रतादौतिलकादिके॥सुज्ञमादिव्रतेसौरो
॥१॥ गोसत्रादिषुसावनः॥त्रयोप्याचार्यसेवादौविकल्पंते॥ ॥१॥
निजेच्छया॥आयुर्दायेतुनाक्षत्रोबार्हस्योधिवत्सरः॥ति॥
तिलव्रतंभविष्ये॥तिलकादीत्यादिशब्देनानंतव्रतं
विवक्षितं॥व्रतादावियनेननिरूढःपशुबंधः॥सुज्ञ
मावास्यिव्रतंविष्णोधर्मोतिरदर्शितं॥आदिशब्दात्तूया

ह्यंतुव्रतंक्रांडेद्रष्टव्यं॥सेगोत्रेगावोवाहःएतत्सत्रमासते
तिब्राह्मणेसमाम्नातं॥आदिशब्देनोसर्गेणाध्ययनंगृह्य
ते॥आचार्यसेवाविद्यार्थिनामाचार्यप्रसादयितुंअथ
वौलिकैःसमाम्नाताआदिशब्देनारलिकेतुचयनांगत्रि
षवणस्नानादिगृह्यते॥नाक्षत्रोज्योतिःशास्त्रेउपयुक्त
ते॥अमनस्यविभागेनविनियोगमाह॥उभेकर्मणिशां
तेचस्तोयनेदक्षिणोत्तरे॥इतिमात्रमेरवाद्युदेवताप्र
तिष्ठायांदक्षिणायनंग्राह्यं॥त्रिवादिषूत्तरायणंग्राह्यं॥
तत्तुविभागेनविनियोगमाह॥वसंतादृतवोदृष्टाचांद्रा
सौराश्चचंद्रतः॥चैत्राद्याश्चैत्रमेषाद्यावविव
स्वतः॥तेष्टाध्यानादयस्तद्वत्प्रतिमूर्तिव्रतपूजनमिति॥वै

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

त्रमौवैशाखमासोचांद्रौवसंतर्तुः॥मीनैमेषमासोमेषवृ
षभमासोवासोरः॥एवंग्रीष्मादिष्वपि॥वसंतेब्राह्मणोनी
नादधीतेत्यादिप्रसिद्धं॥वसंतादिषुमेषादिषण्मासादेवता
मूर्तीनांपूजाविलुप्तधर्मोत्तरदर्शिता॥॥मासानांविभागं
विनियोगंचाह॥मासास्तुसावनःसौरश्चांद्रोनक्षत्रइ
त्यपि॥दर्शांतःपूर्णिमांतोवाचांद्रोसौविप्रवैश्ययोः॥ ॥२॥
सौरोराजःसावनश्चयज्ञेज्योतिर्विक्रेपरः॥माघामास
केदेषुतिलदानादयःस्मृताःइतिस्पष्टोर्थः॥चांद्रमा
सेकिंचिद्विशेषमाह॥चांद्रोऽधिमासोऽसंक्रांतिःसांत
र्भवतिचोत्तरे॥असंक्रांतावेकवर्षद्वौचेसंसर्पआदिमः॥
क्षयमासोद्विसंक्रांतिःसर्वाहेस्पतिसंमतः॥त्रयस्त्रा

ज्जाविवाहादौसंसर्पेहस्यतीउक्तौ॥शुद्धोत्रोक्त
श्चासौनैमलमासेविवर्ज्यते॥॥अथमलमासेवर्ज्य
वर्ज्यानि॥॥क्राम्यारंभस्तसमाप्तिंमलमासेविवर्ज
येदिति॥अनंतव्रतलक्ष्मीव्रतादिक्राम्यं॥क्वचित्तुक्रा
म्यस्यापिसमाप्तिमंगीकरोति॥आरब्धंमलमासात्प्रा
क्षुरुसत्रादिकंचयत्॥तत्समाप्तिंसावनस्यमासस्या
नतिलंघनात्॥द्वादशेदिनसाध्यंप्रजापत्यंक्षुरु॥त्रि
रात्रदिनसाध्यंचांद्रायणं॥तथात्रयोदशरात्रादीनीस
त्राणिद्विरात्रादीनामावश्यकानांचशास्त्रोक्तदिवस
संख्यातस्याश्चलंघयितुमशक्यत्वात्क्षुरुदिसमाप्ति
रावश्यंभाविनी॥आरंभसमाप्तिवदनुष्ठानमपिवर्ज

नीयमित्याश्वलायनाः॥ व्यासः॥ आरब्धेस्यासमाप्तस्य
मध्येस्याद्वैगुण्यलिप्सुवः॥ प्रवृत्तमखिलंकाम्यंनदो
नुष्ठेयमेवच॥ अतएवऋषयः श्रावणाधिमासे
ऽपिचातुर्मास्यव्रतान्यनुष्ठीयंति॥ यश्चाविवयविघ्नो
णमलमासेसमाप्तिरनुष्ठानेचारभ्यते॥ तथाप्रारंभो
पिकश्चिदित्याहुः॥ कारीर्यादिनुयत्काम्यंतस्यारंभस
॥२॥ मापने॥ कार्यकालविलंबस्यप्रतीक्षायाअसंभवात्॥
कारीर्यांवृष्टिकामोयजेतेतिकारीरिविहिता॥ अ ॥३॥
दिश्वेनग्रहयस्तंचिकित्सितुरक्तोद्वेष्टिविहिता॥
तत्रयदिमलमासमपनेतुंकालविलंबंप्रतीक्ष्यते॥
तदासस्यानिशुष्येयुः॥ ग्रहयस्तोपिम्रियेत॥ काम्य

कर्मस्येवनित्यकर्मस्यपिवर्ज्यीवर्ज्यविभागदर्शयति॥ अ
नन्यगतिकंनित्यमग्निहोत्रादिनसंत्येत्॥ गसंतरयुतंनित्यं
सोमयागादिवर्जयेत्॥ सायंप्रातर्विहीनस्याग्निहोत्रस्या
करणप्रत्यवायादनन्यगतिकत्वं॥ आदिशब्देनदर्शपूर्णमा
सौयाद्यौ॥ सोमयागस्यवसंतर्तुविहितस्यशुद्धमासेपिक
र्तुरशक्तौनिरूढःपशुबंधोगृह्यते॥ नित्यकर्मन्यायेननै
मित्तिकेतिदिशति॥ अगतिरयंस्नानंदानेष्टिर्गतिसंयुता॥
इत्यनैमित्तिकंतस्यव्यवस्थानित्यवन्मतेति॥ मलमासेप्रा
प्तेग्रहणशुद्धमासेसंपादयितुमशक्तादगतित्वं॥ वैश्वा
नरंद्वादशकपालंनिर्वपेत्॥ पुत्रेजातइतिविहितजाते
ष्टिस्तथैवस्याच्छुद्धमासेपिकर्तुरशक्तावगतियुक्तं॥ त

दुर्लभत्वात्कृष्णे॥प्रवृत्तमळमासाश्राद्धकाम्यमसमा
पितं॥आगतेमळमासेपितृसमाप्यमंत्रायमिति॥प्र
याद्धिकंस्यात्तुमरणेसमृतानांतुमळेस्यादाब्दिकंतरं॥
मळमासरहितेद्वैवेशाखेमृतस्यतुयद्युपरितनवि
हितेसंवत्सरेअधिकवैशाखेप्रथमंप्रयाद्धिकंप्रापु
यात्तदाकर्तव्यमेव॥॥अधिकवैशाखेप्रथमंयाद्धि
कंप्राप्नुयात्तदाकर्तव्यमेव॥॥अधिकवैशाखेमृतस्यतु ॥४॥
प्रथमंप्रायाद्धिकंसर्वथानाधिमासेप्राप्नोति॥किं
तुआब्दिकांतरंयदाकदाचित्अधिमासेप्राप्नोति
तदातत्कर्तव्यं॥अन्यच्चकाळनिर्णयदीपिकाकारेणो
क्तं॥चैत्रेतिवत्सरेसमछिनेतत्राधिकंमासिकमिति॥॥

तथाचाचारेन्दुशुक्लः॥॥अहृमंबुघटद्यादनंदो
पिसुसंचितं॥संवत्सरेविवृद्धेपिप्रतिमासंचमासि
कमिति॥॥अथमळिम्लुचोमतिचारमध्येतदाब्दि
कंकुर्यान्मासचतुर्दशोदृति॥॥अस्यायमर्थः॥मृत
वर्षमध्येचेन्मळमासोभवतितदाचतुर्दशोमासिप्रथ
माब्दिंकर्तव्यं॥पक्षयोर्विनियोगमाह॥॥दैवेमुख्यः
शुक्लपक्षोशेषःपित्र्येविपरीतइति॥पक्षःपंचद
शादिनात्मकः॥तत्रवक्ष्यमाणविषयेबुद्धिसमा धा
यदैवंपित्र्यंविधत्तेनुकामति॥उपवासश्चैकभक्तं
नक्तंचायाचितव्रते॥॥दानंचषड्विधंदैवंक्रमादत्र
विविच्यते॥॥अत्रोपवासेप्रतिपदोनिर्णयः॥शु

कृष्णपक्षेदर्शविद्धासप्तमीविद्धाद्वितीयया॥उपोष्याप्रति
पच्छुक्लासुख्यास्यादापरविद्धा॥तदभावेतुसायाह्न-
व्यापिनीग्राह्येतामिति॥शुक्लप्रतिपदोभावेस्याद्विद्धा
यांसायाह्नव्यापिन्यवश्यंभावःयतिसायाह्नादर्वा
कृष्णपराह्णेपिक्रियतीभवतितदाप्रशस्ता॥तत्रसा
यान्हापराह्णयोर्विद्धस्तविद्धोषमेवगमयितुंस्या
दमतमतेविभागंदर्शयति॥प्रातःसंगवमध्या
ह्नोपराह्णःसायमितिसः॥तत्रान्हःपंचधाभागोभु
व्यादित्यादिभागतः॥उदयेपूर्वयातिथ्याविध्यतेत्रि
मुहूर्तकैः॥सायंतूत्तरयातिथ्यान्यूनयाननुविध्यते॥
उपवासव्रतेकुर्याद्द्वितीयातुपरान्विते॥तदुक्तंवि

॥५॥



DR. BHAU DAJI

ष्णुधर्मोत्तरे॥एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्दशी॥त्र
योदशीअमावास्याताउपोष्याःपरान्विताइत्यादिव
चनात्सर्वाद्वितीयापरैव॥द्वितीयाप्रतिपद्युक्तात्रिपुरा
णवचनंतुमद्वितीयापरं॥तत्रभगिनीभिर्मातरोभो
ज्यंते॥रंभास्यांवर्णयित्वातृतीयाद्विजसत्तम॥अन्ये
षुसर्वकार्येषुगणयुक्ताप्रशस्यते॥चतुर्थीचतृतीया
यांमहापुण्यफलप्रदा॥कर्तव्याप्रतिपद्विद्धासगणे
शस्तुतोषिणीतिवचनात्तृतीयायुतैवोपवसनीया॥पं
चमीतुप्रकर्तव्याषष्ठ्यायुक्तातुनारदीयवचनात्परैवो
पोष्या॥शुक्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्दशी॥अमा
वास्यातृतीयाचनाउपोष्याःपरान्विताः॥अन्याश्चतिथ

यःसर्वाउपोष्याःपूर्वसंयुतेति॥अन्याश्चतिथयःसर्वाइ
तिवचनांतरैर्विहितपरविद्धोपवासनीयतिथिव्यतिरि
क्ताइत्यर्थः॥तृतीयैकादशीषष्ठीतथाचैवाष्टमीतिथिः॥
शुक्लपक्षेतुपूर्वैताउपवासव्रतादिषु॥शुक्लाष्टमीदृह
तपासाविन्नीवटपेत्कृत्स्नी॥कामत्रयोदशीरंभाउपोष्याः
पूर्वसंयुताः॥इदंव्रतेषुसर्वेषुकर्तव्यंसंमुखीतिथिः॥६॥
॥६॥रिति॥॥इतिउपवासतिथिनिर्णयः॥एकभक्तस्यकाल
निर्णीयते॥अथैकभक्तस्यमुख्यकालस्त्रिधाविभक्त
स्याह॥मध्यंगतःतस्यांतेएकभक्तमिति॥अयंमुख्यःका
लोमध्याह्नव्यापिनीग्राह्या॥एकभक्तंसदातिथिरितिप्र
पुराणवचनात्॥अतऊर्ध्वंगौणःसोसूत्रयावधिरिति॥

अथदिनद्वयेपिमुख्यकालसमव्याप्तितिथिर्वर्ततेतदापूर्वै
व॥वैषम्येणयदातदामुख्यकालाधिक्ंययाव्याप्यतसैवकृ
ह्यते॥॥अथनक्तकालमाह॥प्रदोषव्यापिनीग्राह्यातिथिर्न
क्तव्रतेसदा॥एकादशीविनासर्वाशुक्लेसमाश्रिताइति॥
प्रदोषप्रमाणंवक्ष्यते॥त्रिमुहूर्तःप्रदोषःस्याद्रात्रेस्तंगतेत
तः॥इतिस्कांदोक्तंज्ञेयं॥उदयाद्रात्रौसंध्याघटिकात्रय
मुच्यते॥सायंसंध्यात्रिघटिकाअस्तादुपरिभास्वतः॥चत्वा
रिंशन्निमेषाणिसंध्यायांपरिवर्जयेत्॥आहारंमैथुनंनिद्रां
स्वाध्यायंचचतुर्थके॥एवंचसंध्यायांभोजननिषेधेप्रायेणस
त्रदर्शनासायंसंध्यातस्मान्नसत्रदर्शनंपर्यंतपरेप्रदोषे
नक्तंकुर्यादित्यर्थः॥आदित्यवारादौनक्तभोजनस्यनिषेध
स्यापिननक्तंयाज्ञमित्याह॥कालनिर्णयदीपिकाकारः॥

नोहेयंवितनुतेतो व्रतवताप्यादिसवारादिद्धिति॥सोरेव्र
तेतुसायान्हव्यापिनीनप्रदोषगेति॥माधवः॥अथप्रदोषे
नक्तंतिथिर्दिनद्वयेचेन्नास्तितदासायंमध्यान्हव्यापिन्यां
दिवैवनक्तंकार्यं॥तदुक्तंस्कांदे॥दिवसस्याष्टमेभागेयदा
मंदायतेरविः॥तन्नक्तंनक्तमित्याहुर्नतंनिशिसमर्चनं॥य
तेनक्तंकालमाह॥नक्षत्रदर्शनान्नक्तंशुद्धस्यबुधैःस्मृतं॥
यतेर्दिनाष्टमेभागेतस्यरात्रौनिषिध्यते॥तृतियतिशुद्ध॥ ॥७॥
योनक्तंकालः॥उपवासस्ययःकालःसएवायाचितव्रते॥इ
तिनक्तंकालनिर्णयः॥॥अथनक्षत्रोपवासनिर्णयः॥उपो ॥७॥
षितव्येनक्षत्रंयेनासंयातिपारकः॥यत्रवापुडुपतेरामनि
शीयशाशिनासहेति॥विष्णुर्धर्मोत्तरे॥यच्चहुरात्रादर्वा
कृतुनक्षत्रंप्राप्यतेतिथौ॥तन्नक्षत्रेव्रतंकुर्यात्तदंतपा

रणंभवेत्॥यदादिनद्वयेऽस्तमयसंबंधितदापूर्वैव॥दि
नद्वयेपिनास्तमयेसंबंधितदापिपूर्वैव॥उदयेत्रिमुहूर्ते
स्थेनक्षत्रंव्रतदानयोः॥श्रावणेतूत्तरंग्राह्यमुपवासा
दिकर्मसु॥॥अथदानव्रतयोस्तिथिनिर्णयमाह॥॥सो
दयेत्रिमुहूर्तायांकुर्याद्दानव्रतानिच॥उभयत्रतथावे
तुपूर्वेद्युस्तदनुष्ठितः॥परत्रेनतथावेचपूर्वाग्राह्यातिथि
क्षये॥तिथेःसाम्येथवाद्वेचग्राह्यतामुत्तरातिथिः॥दयु
पवासेदेवेषदुक्तारतिथिनिर्णयः॥एकोद्दिष्टपार्वण
योर्निर्णयमग्रेवक्ष्यामि॥॥अथसामान्यतःसर्वतिथिनि
र्णयः॥कालनिर्णये॥तिथिःसंपूर्णखंडाचेतिद्विधा॥
संपूर्णायांनसंदेहः॥स्कांदे॥प्रतिपक्षष्टतयःसर्वा
उदयादुदयंरवेः॥संपूर्णाइतिविख्याताहरिवासर

र्जिताइति॥दिनद्वयसंबंधिनीखंडातस्याःनि
र्णयमाह॥शुक्लास्यात्प्रथमाचेत्सामेद्याचापराह्णिकी
तिस्कंदपुराणवचनादपराह्णव्यापिनीपूर्वविद्धाप्रति
पद्ग्राह्येत्यर्थः॥अन्यातूत्तरतोखिलेति॥अन्यासर्वाप्र
तिपदपराह्णगाउत्तरविद्धाग्राह्येत्यर्थः॥॥अथद्विती
यानिर्णयः॥प्रतिपत्संमुखाकार्यादितीयाप्रतिपद्यु
क्तेति॥सामान्येनप्रवृत्तस्यवाक्यस्यशुक्लपक्षेतिशिष्यते ॥८॥
॥८॥ह्या॥यस्यामस्तमितोरविरित्यनेनमार्कंडेयपुराणेवच
नेनसमानार्थत्वेनशुक्लाद्वितीयाविषयत्वेसति॥प्रति
पत्संमुखाकार्यासदेद्याचापराह्णिकी॥पूर्वाह्णिकीत्व
कर्तव्याद्वितीयाविषयत्वेसतिपिचतादृशीतिस्कंद
पुराणवचनेनपूर्वाह्णगायाःशुक्लद्वितीयायाःपूर्व

विद्धसमुक्ता॥सितात्परतःसर्वेति॥युग्माग्नियुगभूतानां
षण्मुन्योर्वसुरंध्रयोः॥रुद्रेणद्वादशीयुक्ताचतुर्दश्याचपू
र्णिमा॥पतिपच्चयुग्मावाक्यतिथ्योर्युग्मफलमिति॥यु
ग्मवाक्यात्सिताःसर्वाःपराःकार्यइत्यर्थः॥॥अथतृतीया
निर्णयमाह॥रंभान्योत्तरतइति॥तथाचब्रह्मवैवर्ते॥रंभा
व्रतंतृतीयायांतुतृतीयाद्विजसत्तम॥अन्येषुसर्वकार्येषुग
णयुक्ताप्रशस्यते॥गणश्चतुर्थी॥अथचतुर्थीनिर्णयमाह॥
॥विनायकव्रतव्यतिरिक्तायाश्चतुर्थ्याःपरविद्धंसमुक्तं ८८
ब्रह्मवैवर्ते॥तृतीयासंयुताचार्द्धेचतुर्थीसाफलप्रदा॥क
र्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणी॥गणनाथंसुतरां
षोतोषयतीतिगणनाथसुतोषिणी॥इतिकालनिर्णयका
रैरीरितं॥अत्रमाधवस्त्वन्यथाआचष्टे॥चतुर्थी

तुपरोपोष्यागणनाथव्रतस्यतु॥मध्यान्हव्यापिनीपूर्व्यात
दूनाचेत्तृगचतुर्थ्यपि॥चतुर्थीगणनाथस्यमाघविद्धाप्रशं
स्यते॥मध्यान्हव्यापिनीचेत्सापरतश्चेत्सरेहनीफविद्धोत
रतश्चेत्॥अन्यथापूर्वविद्धैवमाघ्योगप्रशस्तितइति॥
पूर्वद्युरेवतद्व्याप्तौपूर्वासंप्रयातिथिः॥नोचेत्सर्वस्वं
चमीयोगसंतप्रशस्यते॥गौर्यांशुक्लचतुर्थ्यास्तुनागवि
द्धानिषिद्धतइति॥विनायकव्रतनागव्रतव्यतिरिक्तंच ॥९॥
तुर्थीपरेवोपोष्या॥तयोस्तुव्रतयोर्मध्यान्हव्याप्तिर्निर्ण
यः॥॥अथपंचमीनिर्णयः॥कल्लापूर्वयुक्तासितापरयु
क्तेतिदीपिकोक्तेः॥तदुक्तंस्कंदे॥पंचमीतुतथाकार्याच ॥९॥
तुर्थासहितातिसा॥इतिवचनेनकल्लापूर्वा॥पंचमी
तुपरकर्तव्याषष्ठ्यायुक्तातुनारदेतिब्रह्मवैवर्तवचनातु

कल्लापरेतिभावः॥॥अथषष्ठीनिर्णयः॥॥षष्ठीतु
सर्वदापरैव॥नागविद्धानकर्तव्याषष्ठीचैवकदाचन॥षष्ठ्यो
युतातुकर्तव्यासप्तमीतासर्वदा॥षष्ठीचसप्तमीयत्रतत्र
सन्निहितोहरिरितिवचनेनसप्तमीसंयुतैवकार्या॥
॥॥अथाष्टमीशुक्लाकल्लापरेत्याहनिमेगे॥॥पूर्वविद्धा
प्रकर्तव्यापरविद्धानकर्हिचित्॥शिवरात्र्योरसवपक्षे
तस्याःपरविद्धैमुक्तंब्रह्मपुराणे॥अष्टम्यानवमीविद्धा
नवम्याचाष्टमीयुता॥अर्द्धनारीश्वरोयोगोउमामाहेश्व
रीतिथिः॥अष्टमीनवमीयोगोमहोत्साहेमहोत्सवः॥शि
वरात्र्योःशिवक्षेत्रेपक्षयोरप्यसितेरपीतिवचनाच्चुग्म
वाक्याच्चनवम्यपिपूर्वयुतैव॥नकुर्यान्नवमीतातदन्या
म्यांतुकदाचनेति॥देशग्रामादिदिनत्रयनिर्णयप्रस्ते

वक्ष्यामि॥अथचतुर्दशीपक्षद्वयेप्यपराण्हव्यापिनीकु
र्यात्॥दिनद्वयेपराह्णगायःपूर्वविद्धत्वमाह॥चतुर्दशी
तुकर्तव्यात्रयोदश्ययुताविभो॥ममप्रीतेर्महाबाहो
सर्वदाचापराह्णिकीतिस्कंदपुराणवचनात्॥अपरा
ह्णव्याप्त्यासावेवैत्रश्रावणयतिरिक्तशुक्लतृतीयास्वपू
र्वेतिकालनिर्णयदीपिकाकारः॥नोचेद्वैत्रनभो
गतेतरसितास्यादूर्ध्वमाघासितेति॥॥अयंचप्रति॥१७०॥
॥१७०॥ पदादिसर्वतिथिनिर्णयःसामान्येनोक्तः॥सपित्र्यक
र्मव्यतिरिक्तोपवासव्रतादिषुज्ञेयः॥॥तथा॥स्कंदो द
र्शस्तथाहिंसात्रिविधंतिथिलक्षणं॥स्कंददर्शपिरो
पुण्यैर्हिंसास्यासूक्ष्मकालिकी॥स्कंदः सामा॥दर्शवृद्धिः॥
हिंसाक्षयःकर्मलोपस्यःकालस्तत्कालव्यापिनीति

थिः॥तत्रैवयोमौलिकुर्वतिह्रासवृद्धीनकारणं॥यदैक
स्मिन्दिनेव्रतादिकर्मकालगानास्मिन्दिनेतदाक
र्मलोपस्यःकालइत्यादिवचनात्कर्मकालएवग्राह्य
स्तिथिः॥भाट्टकालनिर्णयदीपिकाकारः॥अथसमे
यत्नेप्येकवाक्यवेद्दकासाखलुनास्यतेव्रततिथीयुग्मा
भिधाचेतरेति॥अथदिनद्वयेप्यव्यापिनीकर्मकालति
थिस्तदा॥यांतिथिंसमनुप्राप्योदयेयातिभास्करः॥
सातिथिःसकलाज्ञेयास्नानदानव्रतादिषु॥॥तथा
विद्धुधमंत्रिरे॥उदितेदेविकेभानौपित्र्यंवास्तमिते
रवौ॥द्विमुहूर्तेत्रिरुद्रश्चसातिथिर्हिक्षयेयोः॥भा
स्करोदितेसतिअर्कोमुहूर्तद्वयंदेवपरं॥रवौअस्त
मितेसतिअर्कस्त्रिमुहूर्तेपित्र्यं॥अतस्तत्कालव्यापि

नीतिथिर्ग्राह्येयर्थः॥दिवसव्रतेरात्रिव्रतेचयुग्मस्या
नादरेणतच्चूक्त्याह्येयर्थः॥जाबालिः॥अहस्सुतिथ्य
यःपुण्याःक्रमेनिस्थानेतोदिवा॥नक्तादिव्रतयोगेषुरा
त्रियोगोविधिष्यते॥अहोरात्रसाध्यव्रतेतुअहोरा
त्रव्यापिनीग्राह्येयाह॥यास्कः॥दिवारात्रौव्रतं
यच्चएकमेवतिथ्योगतं॥तस्यामुभययोगिन्यामाचरे
तद्व्रतंव्रतिथिः॥यदायुग्मदिनेऽस्तमयसंबंधिनीअ ॥१७१॥
युग्मदिनेतूदयास्तमयसंबंधिनीतदाउभयसंबंधि
न्याःप्रातस्त्यायाह्येयाह॥कालनिर्णयेपि॥अश
स्तमयोदयस्थगितरांयुग्मास्त्रिधांतांयडेत्॥इत
राउदयास्तमयसंबंधिव्यतिरिक्तयुग्मास्त्रिधामवंतु
तामित्येतदियर्थः॥अनेनोदयास्तमयसंबंधिन्याः

DR. BHAU DAJI MEMORIAL ... ग्रन्थालय

प्रातस्समुक्तं॥युग्मदिनेव्रतप्राप्तौप्रातरेवसंकल्पइ
त्याह॥प्रातःसंकल्प्यहरेदनुपवासव्रतादिषु॥इति
वचनात्॥अन्यत्रयुग्मदिनेविहिततिथेःप्रारंभतंसं
कल्पंकुर्यादियर्थः॥शुक्लपक्षेरविदिनेप्रवृत्तेचोत्तराय
णे॥पुनामर्क्षेधनस्थेऽर्केगोहयात्समीव्रतमि
त्यादिवचनैःसप्तम्यादिकालेसंकल्पश्रवणादितिभावः॥
यदिव्रतविघ्नेपलसंकल्पकालेविरोधोनातदातत्काल
संकल्पंकुर्यादियर्थः॥अन्यच्च॥वसिष्ठः॥पारणेमर
णेदर्शेतिथिस्तात्कालिकीस्मृता॥पित्र्येस्तमयवेला
यांस्पृष्टापूर्णानिगद्यते॥स्कांदे॥अभ्यंगेचोदधिस्ना
नेदंतधावनमैथुने॥जातेचमरणेचैवतत्कालव्यापि
नीतिथिः॥मन्वादौचयुगादौचग्रहणेचंद्रसूर्ययोः॥

व्याप्तिपाते चवेधस्यांतत्कालव्यापिनीक्रियेति॥इति
सर्वशास्त्रार्थसंग्रहेसामान्यतस्सर्वतिथिनिर्णयः॥
अथव्रतविशेषतिथिनिर्णयः॥अत्रनिर्णये॥होमो
कावट्टपेटकीबलिदिनंवह्नि व्रतोक्तातिथिर्दूर्वाव्या
सहतपाचनवमीदुर्वाव्रतेआवली॥षष्ठीस्कंधयु
क्तोचयोदशीतिथिःकामस्यस्यात्सप्तमीयेताःपूर्वयुता
व्रतेषुतिथयोग्राह्यास्तथारोहिणीति॥१॥बलिदिनं
बलिप्रतिपत्॥दूर्वास्याद्दूर्वाष्टमी॥सदृहतपाहतपा
संबंधिनीतिथिः॥आवलीआवलमासस्यपूर्णिमाह
ताःपूर्वा॥अथविशेषतिथिनिर्णयेसंवत्सरप्रतिप
न्निर्णयः॥अखंडितायांनास्तिसंदेहः॥खंडाचेपरे
द्युः॥नंदासंवत्सरादौनुदर्शेविद्धानकर्हिचित्॥

परिविद्धाकर्तव्यात्रिमुहूर्तीयदाभवेत्॥मुहूर्तम
पिकर्तव्याप्रतिपद्दितयान्विता॥तदुक्तंभविष्योत्तरे॥या
शुक्लाचैत्रमासस्यवत्सरादितिथिःस्मृता॥मुहूर्तद्वि
तयंचेवमुहूर्तंवायदाभवेत्॥वर्ततेवासरेयस्मिंस्तु
तःसोदृपतिर्भवेत्॥रत्नावल्यां॥बहुभिःक्रीर्तितोरा
जन्वेरुदयकालिकः॥यत्रभूपद्वयेदृष्टोभूमाग
वस्तिथिक्षये॥उक्तंचनारदसंहितायां॥उदयेद्वित
येपिपूर्वानोदययुग्मेपिपूर्वेस्यात्॥इतिवाक्यपूर्व
वाक्यविरोधेप्राप्तेद्वितीयपरिहारायोक्तंगर्गसंहि
तायां॥आमाप्रतिपदोःसंधिमुहूर्तोपूर्वतोयदि॥त
दातद्दिनयोरन्यापरतश्चेत्परेहनीति॥तेनेयंप्रतिप
दुदयव्यापिनीग्राह्येत्यर्थः॥दिनद्वयेतदभावे

॥१२॥

मासीवापूर्वैव।।चैत्रनवरात्रेतुद्वितीयायुतैव।।अत्र
तैलाभ्यंगोनिषेधः।।चैत्रेमलमासेतुवसरारंभमल
मासेकार्यइत्येके।।शुद्धएवेत्यपरे।।अत्यामेवप्रपादनं।।
।।इतिघटिकानिर्णयः।।।।अथगौरीद्वितीयानिर्ण
यः।।इयंमन्वादिरपि।।चैत्रशुक्लद्वितीयायांगौरीतृ
तीयापूजयेत्तु।।नारीभिर्भक्तिसंयुक्तंयावन्मासोभवे
दिह।।ज्ञेयंचैववर्तीदोलामारोहयेद्गौरींकरेणस ॥१७॥
मन्वितां।।पूजयेन्मासमात्रंतुनारीसौभाग्यमिच्छति।।
इयंद्वितीयापरेसाह।।स्कंदः।।चतुर्थीसंयुतातीवद्वितीय
यासाफलप्रदा।।अवैधव्यकरीस्त्रीणांपुत्रपौत्रप्रव
र्द्धिनी।।माधवेपि।।रमाद्वितीयापूर्वास्यादुत्तरास्या
दुत्तरांतरे।।मुहूर्तमात्रसंयोगेदिनेगौरीव्रतंपरेति।।

रंभाख्योवर्ज्यतिथावनुद्वितीयांद्विजसत्तम।।अन्यत्रसर्वका
र्येषुशूलयुक्ताप्रशस्यते।।शुद्धाधिकायामप्येवगलयुक्ताप्रश
स्यते।।गलश्चतुर्थीतियुक्तःकार्यस्यर्थेः।।इतिगौरीद्वितीया
निर्णयः।।।।चैत्रशुक्लनवम्यांतुरघुनाथंप्रपूजयेत्।।यु
तोमध्याह्नवेलायांसोऽतोहिजगद्धितः।।इयंनवमीखंडा
चेन्मध्याह्नव्यापिनीपरेवह्याह्नसंग्रहे।।नवमीचाष्टमीवि
द्धाराममपरायणैः।।उपोषणंनवम्यांतुदत्तम्यांचैवपा
रणं।।वशिष्ठः।।श्रीरामजन्मनवमीसंपूर्णायदिसोतमा।।
खंडाचेसरविद्धैवकर्तव्यासप्तिसंयुतैः।।द्वयोर्मध्येदि
नेप्राप्तिःकर्तव्यापरसंयुतेति।।तथाचोक्तमगस्तिसंहितायां।।
चैत्रेनवम्यांप्राक्त्रिदंडपुष्येपुनर्वसौ।।उदयेगुरुगौरी
नाम्नियोगेग्रहपंचके।।मेषपूषणिसंप्राप्तेलग्नेकर्कटके
कृये।।आवीरासीत्सरयूकोशलान्यापरप्रभावू।।तस्मि

न्दिनेतुकर्तव्यमुपवासव्रतादिकं॥तत्रउत्तरणंकु
र्यादुघुनाथपरोमुदीत्यादि॥सदेत्यादिश्रवणाद्दत्तस्यनि
त्यतोक्ता॥तथाचतत्रैव॥यस्तुरामनवम्यांतुभुंक्तेमोहा
द्विमूढधीः॥कुंभीपाकेषुघोरेषुपच्यतेनात्रसंशयः॥कुर्या
द्रामनवम्यांतुउपोषणमतंद्रितः॥मातुर्गर्भेनवास्नोतिस
चरामोभवेत्स्वयमित्यत्रफलप्रत्यवायौमोक्षफलकत्वयोः॥
श्रवणात्॥तत्रनवमीद्विविधा॥शुद्धाष्टमीविद्धाचेति॥शु
द्धापिविद्धानक्षत्रसहितातद्रहिताचेति॥तत्रसनक्षत्रो
तमा॥चैत्रशुक्लेतुनवमीपुनर्वसुयुतायदि॥श्रीरामनवमी
प्रोक्तकोटिसूर्यग्रहाधिकाचेतिअगस्त्यस्मरणात्॥से
वमध्याह्नेपुनर्वसुयोगेप्रशस्ततमा॥सैवमध्याह्नयोगे
नमहापुण्यतमाभवेदितितस्यैवस्मरणात्॥एवंशुद्धापि

त्रिधा॥यत्रमध्याह्नेपुनर्वसुयुक्तनवमीभवतीसोपोष्या
सैवमध्याह्नेत्तरोक्तवचनात्॥तदसंभवेयत्रक्वापिपु
नर्वसुयुक्तोपोष्या॥पुनर्वसुसंयुक्तसंयोगःस्वल्पोपियदि
दृश्यते॥चैत्रेशुनवम्यांतुसातिथ्रिःसर्वकामदेतिस्मरणा
त्॥तस्याप्यसंभवेनवमीमात्रमुपोष्यं॥चैत्रशुद्धनवम्यां
तुकर्तव्यंव्रतमुत्तमं॥तस्मान्नदिनेमहापुण्येजातोरामः
स्वयंहरिः॥तस्मात्सर्वात्मनोकार्यराममुद्दिश्यमतिमतः॥
उपोषणंजागरणंपिहनुद्दिश्यतथैवात्रेत्यादिश्रवणात्॥
विद्धापिद्वादशी॥पूर्वेद्युरेवमध्याह्नव्यापिनीपरेद्यु
रेवमध्याह्नव्यापिनीउभयत्रनोभयत्रसाम्येनवेपम्य
नैकदेशव्यापिनीतिषाढा॥सैवपुनर्वसुयोगात्प्रा
सेद्विधेति॥तत्राद्येनक्षत्रसंभवेसैवोपोष्या॥तदसं
भवेमध्याह्नव्याप्तिंविहायापियत्रयोगःसैवपुन

विद्धसंयोगेऽयस्यात्रापिसमानत्वात्॥एवंद्वितीयेपि॥
तृतीयपक्षेतूभयत्रयोगेपरैव॥नवमीचाष्टमीविद्धाया
ञ्चारामपरायेतेः॥उपोष्यानवम्यांवेदशम्यांपारणंम
वेदितिपूर्वनिषेधात्॥पूर्वेद्युरेवनक्षत्रयोगेतुसाप्यु
पोष्याप्रशस्यात्॥निषेधस्योभयत्रयोगपरत्वसंभवा
त्॥एतेनअष्टमीविद्धासनक्षत्रापिनोपोष्येति॥माध
वोक्तिरप्युक्तविषयैव॥चानुर्थ्यपरैवपूर्वत्रनिषेधा
त्॥परत्रव्रतोपवासनियमघटिकाप्रियाभवेदिति ॥१५॥
विधानाच्चतत्रापिपूर्वत्रैवनक्षत्रयोगसैव॥पुनर्व
स्तूक्तसंयोगइतिवचनात्॥एंचमपरैवोदयिकत्वात्॥
तत्रापिपूर्वनक्षत्रयोगपूर्वोक्तवचनात्॥षष्ठ्यधि
कोपोष्यातत्रापिनक्षत्रयोगस्यात्स्पर्शीति॥॥इतिरा
मनवमीनिर्णयः॥॥अथपारणानिर्णयः॥सा

चतिथिनक्षत्रनियमेतिथ्यंतेचपारणमितिवचनाद्
भयोपवासेउभयांतएवतिथिमात्रोपवासेचतुर्दशी पा
रणंभवेदितिवदनातिथ्यंतएव॥परत्रासायंतिथिसत्वे
पूर्वत्रोपवासप्राप्तेतुपरेद्युरात्रौपारणप्रसंगइत्यलं॥इ
तिपारणानिर्णयः॥॥अथचतुर्दशीपर्वनिर्णयः॥॥
इयंसायंकालव्यापिनीकार्ययुक्ता॥सग्रहे॥मधोःशुक्ल
णमासस्यशुक्लपक्षेचतुर्दशी॥सारात्रिव्यापिनीग्राह्या
नान्यशुक्लेकदाचनेति॥अत्ररात्रिग्रहेनसायंकाल
व्यापिनीग्राह्येत्यर्थः॥अथोदिनद्वयेचेत्सायंकालव्या
पिनीतदापरा॥तदुक्तंयुग्मवाक्ये॥युग्मान्यियुगभूता
नांषण्णुन्योर्वसुरंध्रयोः॥रुद्रेणद्वादशीचतुर्दश्याच
पूर्णिमयादिवचनयोगात्सायंकालेव्यापिनीग्राह्येत्यर्थः॥

सायंकालव्याप्तसूर्यास्तानंतरंप्रथममुहूर्तीसत्येति।नि
र्णयंसंपूर्णयेद्दीनवरात्रोक्तमार्गतः॥षष्ठीमारभ्यपूर्णातांनव
रात्रमुपोषितः॥ ॥अथपूर्णिमापर्वनिर्णयः॥मूलविद्धेनक
र्तव्येदर्शपूर्णेकदाचन।वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमु
त्तमम्मित्रवचनात्॥इयंपरेवमध्याह्नव्यापिनीग्राह्या।दिवपू
र्वाःमध्याह्नव्यापित्वमुक्तमस्ति॥अस्यांसर्वदेवान्दमनक
जायाःमध्याह्नव्यापित्वमुक्तमस्ति॥अस्यांसर्वदेवान्दमनक
नाम्न्यर्चनात्संवत्सरपर्यंतंतत्पूजायाःफलंप्राप्नोतीयु
क्तंलिंगपुराणे॥मधुमासेचतुर्दश्यांपौर्णमास्यांनराधिप॥द
मनेनतांपूजांसंवत्सरकृतामवेत्॥श्रावणमासस्यपूर्णि
मातुपूर्वमध्याह्नव्यापिनी॥तदुक्तंकालनिर्णये॥श्रावणी
दुर्गनवमीदर्वाचैवकुतान्नकी॥पूर्वविद्धाप्रकर्तव्यात्रिव
रात्रिर्बलेर्दिनमिति॥तेनेयंपूर्णिमाश्रावणीकुतान्नकी

॥१९८॥

॥१९९॥

व्याप्तिरितिमुहूर्तीचेत्तरान्यथापूर्वा॥इतिपूर्णिमापर्वनिर्णी
यः॥अथपरशुरामजयंतीनिर्णयः॥वैशाखेशुक्लपक्ष
स्यतृतीयायांजनादेनः॥ब्रह्मलोकात्सवेविष्णुःपृथिव्यांप्रव
भूवह॥यवानुयादयामासरवौमध्यदिनेसतीति॥तेनेयंप
रशुरामस्यजयंतीत्युच्यतेबुधैः॥नारदीये॥वैशाखशुक्लपक्षे
तुतृतीयारोहिणीयुता।दुर्लभाबुधवारेणसोमेनाप्यथवोम
वेनृक्षयादिवाकैःकर्मकालव्यापिनीतिथिर्बुधैरोहिणीयोग
दर्शनंप्रशस्ता॥दिनद्वयेचकर्मकालव्यापिनीअव्यापिनीवात
दापरयुक्तेसाह्नेविष्णोरोहिणीबुधयुक्तापिपूर्वविद्धापरिय
जेत्॥विनापिरोहिणीयोगंसुएषाकोटिगुणापरेति॥नारदी
य॥पूर्वेविद्धदिनेदत्तंयत्किंचिन्मुजनंतुवै॥नवेदग्रहतिथेकुरु
पूजांतद्दिनेसंकल्पयामिति॥इतिपरशुरामजयंतीनिर्णयः॥

इदानीं श्राद्धे निर्णयः कथ्यते। वैशाखे शुक्लपक्षे तृतीया हि यदी
युक्ता॥ दुर्लभा बुधवारेण सोमेनापि युतान्यतिः॥ रोहिणीबु
धयुक्तापि पूर्वविद्धा विवर्जयेत्॥ मङ्गल्यतिथिमाधिक्यतः पुण्य
तिथौ सैव॥ गौरीविनायकोपवासे रोहिणीबुधसंयुता॥ विनो
पि रोहिणीयोगात्पुण्यकोटिगुणापरा॥ अमामनुयुगाक्षांतिथ्य
तिपातमहालयाः॥ अन्वष्टकाश्च पूर्वेद्युः एते वयोदशस्मृ
ताः॥ युगादिरपि॥ सा चोक्तरत्नमालायां॥ माघेपंचदशी श्रवा
नमस्येचत्रयोदशी॥ तृतीयामाधवेशुक्लनवम्यूर्जे युगादय
इति॥ अत्रश्राद्धमुक्तंमात्स्ये॥ तेतंश्राद्धविधानेनमन्वादिषु ॥१७॥
युगादिषुः॥ हायनानिहिसाहस्रंपिण्डान्दद्यादिमंवदेदिति॥
प्रारभेपि॥ यामन्वाद्यायुगाद्याश्चतिथयस्तासुमानवः॥
स्नात्वाकृतानिचदत्त्वाचजप्त्वानंतफलंभवेदिति॥ श्राद्धेपि

वर्ज्यव्यापिनीत्याह्य॥ पूर्वाह्णेतुसदाकार्यशुक्लासंयुतेगो
दयः॥ दैवेकर्मणिपित्र्येचसप्तम्यांचैवापराह्णिकीइतिपु
त्तः॥ हेशुक्लेदर्शयुक्तेसप्तम्युदयगेविदुः॥ शुक्लेपूर्वाह्णि
कंग्राह्यंसप्तम्यांचैवापराह्णिकंतिथेर्मासोनारदीयेवचनाच्च
दर्शेपिकापि॥ ॥अथोमन्वादियुगादिकर्मतिथयःपूर्वा
ह्णिकास्युस्तिथेर्विद्धेयाअपराह्णिकाश्चबह्वृचे॥ स्मार्त्तार्थ
सारेपि॥ युगादिमन्वादिश्राद्धेषुशुक्लपक्षेउदयव्यापिनी
तिथिर्ग्राह्या॥ सप्तम्यपक्षेअपराह्णव्यापिनीति॥ दिनद्वय
सत्वेपरेवैतिथिर्धर्मतत्त्वविदोहेमाद्र्यादयः॥ अनंतम
दृष्ट्वा॥ सत्वेष्वतिथ्यतीपातयुगमन्वादयस्तथा॥ संमु
खाउपवासेषुदानादानंतिमास्मृताइत्याह॥ दानाद
दावित्यपितिश्राद्धसंग्रहः॥ अत्रविशेषोहेमाद्रौ

विष्णो।वैशाखेशुक्लपक्षेतृतीयायांतथैवच।।गंगातो
यनरःस्नातामुच्यतेसर्वकिल्बिषैः।।तस्यांकार्यायवैर्हो
मायवैर्विष्णुंसमर्चयेत्।।यवान्दद्याद्द्विजातिभ्योप्रयत
प्राशयेद्यवानिति।।अत्रैवदानविशेषस्तत्रैवमविष्णो
रिमांप्रक्रम्य।।उदकुंभान्सकरकान्सान्नान्सर्वफलान्वित
न्।।यवगोधूमकणकान्सतुदध्योदनंतथा।।ग्रीष्मेकर्त्त
व्यमेवात्रसस्यदानंप्रशस्यतइति।।देवीपुराणेपि।।तृती ॥५८॥
यायांतुवैशाखेरोहिण्यर्क्षंप्रपूज्यतु।।उदकुंभप्रदानेन
शिवलोकेमहीयते।।मंत्रस्तु।।एषधर्मघटोदत्तोब्रह्म
विष्णुशिवात्मकः।।अस्मप्रदानात्प्रीयंतुपितरोपिपितृ
महाः।।गंधोदकतिलैर्मिश्रंसान्नंकुंभंसदक्षिणं।।पि
तृभ्यःसंप्रदास्यामिह्यक्षय्यमुपतिष्ठतु।।अत्रपिंडर
हितंश्राद्धंकुर्यात्।।युगादिषुचसर्वासुपिंडनिर्वप

णाइतइति।।तस्मात्तृतीयानपूर्वाविद्धाश्रवणात्।।तदु
क्तंस्कंदपुराणे।।वैशाखस्यतृतीयांतुपूर्वविद्धांकरोतियः।।
हव्यदानंगृह्णंतिकव्यंचैवपितामहाः।।यत्रदानंगृह्ण
तिकव्यंतत्रपितामहाः।।तस्मात्सर्वप्रयत्नेनपूर्वविद्धांविव
र्जयेत्।।करोतियदितांमोहात्सेतत्वंयांतिपूर्वजाः।।विष्णो।।पूर्वविद्धा
तृतीयायांवैशाखेमुनिसत्तमाः।।हव्यंकव्यंनदित्तंपू
र्वविद्धाक्षयातिथौ।।गौतमः।।पूर्वविद्धतृतीयायांयद्दत्तंस
लिलंसुतैः।।स्थिरंतद्भवेसर्वंपितॄणांनोपतिष्ठति।।तस्मा
त्प्रयत्नेनराजन्पूर्वविद्धांविवर्जयेत्।।करोतियदितांमो
हात्सेतत्वंयांतिपूर्वजाः।।नोद्वहंतिसुतेःपुत्र्यःबंधुभिस्सं
त्यजेत्सुतः।।इत्यादिवाक्यसंकोचपरंपूर्वविद्धानिषि
द्धं।।नारदः।।वैशाखेशुक्लपक्षेतृतीयारोहिणीयुता

दुर्लभा बुधवारेण चतुर्थी संयुता तथा ॥ एवं रक्तदाचिल
प्ययोगप्राशस्याद्वितीयायुक्तापिस्यात् ॥ मैवं ॥ रोहिणी
बुधयोगेपिपूर्वयुक्तनग्राह्या ॥ तदुक्तं स्कंदपुराणे ॥ वैशा
खस्यतृतीयांतुपूर्वविद्धांनरोत्तमाः ॥ हव्यंदेवानंगृह्णंति
कव्यंचैवपितामहाः ॥ यत्रदेवानगृह्णंतिकव्यंतत्रपितामहाः ॥
तस्मात्सर्वप्रयत्नेनपूर्वविद्धांविवर्जयेत् ॥ कविष्यपूर्ववि
द्धातृतीयायांवैशाखेमुनिसत्तमाः ॥ हव्यंकव्यंनकर्तव्यं ॥१९॥
तत्सर्वंनिःफलंभवेत् ॥ पानीयंरुधिरंभूत्वापितॄणामुपति
ष्ठति ॥ अन्नंमांसमयंदत्तंपूर्वविद्धास्वयातिथौ ॥ गोत्रेमः
पूर्वविद्धतृतीयायांयद्दत्तंसलिलंसुतैः ॥ रुधिरंतद्भवेत्स ॥१९॥
र्वंपितॄणांनोपतिष्ठति ॥ तस्मात्प्रयत्नेनोराजन्पूर्वविवर्ज
येत् ॥ ० ॥ इतिपुनर्भूः ॥ ॥ तदुक्तं स्कंदपुराणे ॥ रोहिणीबुध

सुक्तापिपूर्वविद्धातिनिंदिता ॥ मत्स्यपुराणेतासामोहाद्
हंतिपुण्यंपुराकृतमिति ॥ नन्वेवमलक्ष्मयोगसद्भावे
उत्तरविद्धानोचेत्पूर्वविद्धानरोहिणीबुधयोगःप्रा
योनुवादः ॥ केवलचतुर्थीयुक्तावटतीयापूज्या ॥ तदुक्तं
देवीपुराणे ॥ गौरीविनायकोपेतारोहिणीबुधसंयुता
विनापिरोहिणीयोगापूज्यकोटिफलप्रदेति ॥ एवंस्व
वाक्यपर्यालोचनयाविरोधापादनीयः ॥ केचित्तुचतु
र्थीयुक्तापिटतीयापूज्या ॥ ॥ इतिअक्षय्य
तीयानिर्णयः ॥ ॥ ० ॥ अथनरसिंहजयंतीनिर्णयः ॥
नरसिंहपुराणेव्यासवचने ॥ शुक्लपक्षेचतुर्दश्यांमा
सिमाधववल्लभे ॥ सायंकालेसमासंभेप्रादुर्भूतोन्र
सिंहशरीरीतिवचनेनसायंकालव्याप्तिर्नीयाह्यस्यैः ॥

यदिदिनद्वयेचेत्सायंकालव्यापिनीअव्यापिनीवातदा
सायान्हव्यापिनीपरयुक्तेसुकं॥तत्रैव॥चतुर्दशीनृसिं
हस्यसायंकालेऽर्द्धद्वये॥अव्यापिनीव्यापिनीवातदोषाध्या
परान्विताइति॥पूर्णायुक्तानुकूलेत्यानरसिंहस्यतुष्टये॥
तदुक्तंस्मृतिसिंधौ॥नारदीयेशुक्लचतुर्दश्यांश्रीनृसिं
हपुराणे॥नरसिंहजयंत्यास्यव्रतंकुर्यादतंद्रितः॥वै
शाखेशुक्लपक्षस्यचतुर्दश्यांविधुस्मृतिः॥अस्तंगमिमि ॥२०॥
सर्वेषांपुरुषोत्तमस्यमध्यतः॥प्रबभूवमहाविष्णुर्नरसिं
हाख्यतिर्नृपः॥तस्यांव्रतंनरैःकार्यंमहाविष्णोरतिप्रि
यं॥शनिवारयोगेवृद्धिंनक्षत्रियोगेनभूमिप॥मह
ज्जयंतीविख्यातादुर्लभाव्रतिनामिहेति॥योगकरण
अपितत्रैव॥सिद्धियोगस्यसंयोगेवह्निजेकरणेतथा॥

तथा॥पुण्येसौभाग्ययोगेनक्षत्रेदैवयोगतः॥सर्वे
तिस्तुसंयुक्तेकृत्याकोटिविनाशने॥एतदन्यतरेयोगेतदि
नंपापनाशने॥केवलेनक्षत्रकर्तव्यंमद्दिनेव्रतमुत्तमं॥अ
न्यथानरकंयातियावच्चंद्रदिवाकरौइति॥॥कविष्य
पुराणेपि॥वैशाखेशुक्लचतुर्दश्यांशुद्धोवह्निजेवायुभ॥
संदवारेनृसिंहोमूत्रेतायांचादिकृत्यके॥सायंकालेस
दातंरक्षादमनकेरणात्॥एषपुण्यतमोयोगोदिवासिं
हेदयाकरः॥प्रायः सुदुर्लभतरोधर्मकामार्थमोक्षदः॥
अर्द्धोदयानामयुतंनचास्यास्तिथेःकलां॥प्राधान्येन
तिथिःपूर्णाकेतुस्यादिसंयुता॥चतुर्दशीमपिवर्णानां
व्रतेस्मिन्नधिकारितेति॥तच्चनित्यं॥॥वर्षंवर्षंतुकर्तव्यं
ममसंतुष्टिकारकं॥महाउग्रमिदंश्रेष्ठंमानुषैर्मवभीरु
भिरितिवीरासाश्रवणात्॥तेनेवक्रीयमाणेनसहस्रच्छ

दशीफले ॥ जायंतेमत्प्रसादाद्धिमानुषाणोमहात्मनामि
तिफलंश्रवणात्साम्यं च ॥ तत्रचतुर्दश्यांविद्धस्यति ॥ अ
स्तंगामिनिप्रदोषव्यापिनीसायंकालव्यापिनीवा ॥ तत्र
विद्धायांविजयमुक्तंश्रीनृसिंहप्रादर्भावावगमात्त
लव्यापिनीतिथिरंगमितिगम्यते ॥ साचद्विविधा ॥ शुद्धा
विद्धाच ॥ तत्रोदयकालमारभ्यास्तकालव्यापिनीशुद्धा ॥
विद्धावस्तकालत्रयोदशीयुक्तेति ॥ तत्रशुद्धायांन ॥२७॥
संदेहः ॥ शुक्लपक्षेचतुर्दश्यामाधवसंज्ञिके ॥ प्रादु ॥२७॥
र्भूतोनृसिंहस्तुतस्मात्तांसमुपोषयेदितिमविष्यपुराणा
त् ॥ विद्धाचतुर्दशी ॥ पूर्वेद्युरेवसायंकालव्यापिनी ॥ परद्यु
रेव ॥ उभयत्रेति ॥ तत्रायंपूर्वेव ॥ चतुर्दशीशुक्लेव्यत्रयो ॥ नोभयत्रेति २
दश्यायुताविमो ॥ ममप्रकर्मकृद्बालभवद्यावरा

लिकीर्तिस्तांदात् ॥ द्वितीयेपरेव ॥ शुक्लाचतुर्दशीग्राह्यापरविद्धा
सदाव्रतेव्यासस्मरणात् ॥ द्वितीयेपिपरेव ॥ अनंगेनसमायुक्तासो
पोषाचतुर्दशी ॥ पूर्णायुक्तांनुतांकुर्यान्नरसिंहस्यतुष्टयेइतिमवि
ष्यपुराणात् ॥ तत्रैव ॥ यःकरोतिनरोमोहात्कामविद्धांचतुर्दशी ॥ अ
नापयेद्वियुज्यतेतत्स्मात्तांपरिवर्जयेदितिनिषेधाच्च ॥ चतुर्थेपि
परेव ॥ यद्यप्यत्र ॥ सायंतुमंगलाचारःप्रविशेद्वरिमंदिरं ॥ आरंभे
नव्रतंतत्रस्वस्तिवाचनपूर्वकमितिविहितसायंकालव्याप्तावान
परत्रापियुज्यते ॥ तथापिप्रातःसंकल्पयद्विद्धानुपवासव्रतादिक
मितिसंकल्प्यकालेतिथिसत्वातत्तोमध्याह्नवेलायांनद्यादौविमले
जलेगत्वादेवरक्षातेवातडागेवागृहेशुभे ॥ वैदिकेनचमंत्रेण
स्नानंकृत्वाविचक्षणइत्यादिव्रतपूर्वागकालेचमुख्यतिथिसत्वा
त्स्वधानंकालेपिसातिथिःसकलाह्नेयास्यामप्युदितोरविरितापि
दंतिथिसाकलेनगोणातिथिसत्वाच्चपरेवाचेतिएतेहेतु

नामन्यतरस्यापिपूर्वत्राक्यात्॥एवंस्यादियोगोप्येकेत्रे
वविद्यमानोनसंदेहापादकः॥कोचंतरावात्॥प्राधान्येनति
थेःपूर्णाकिंतुस्यादिसंयुतेतिहुभयत्रविद्यमनःपरत्रैवग्राह्यः॥
प्रातःसुदुर्लभतरोधर्मकामार्थमोक्षदइतिप्रातस्स्नातिव्रतयत्
यदावैकत्ररात्रापत्रदिवायोगसङ्गवस्तदादिवैवविद्यमानोग्रा
ह्यः॥एषपुण्यतमोयोगोदिवासिंहोदयादृयइतिकविष्यात्॥उ
भयत्रापियत्किंचिद्व्रतयोगसङ्गवेयत्रैवाधिक्योगस्तत्रैव॥
एतदन्यतरयोगेतद्दिनंपापनाशनमितिनारसिंहात्॥तस्यपा
रणातुमध्याह्नेनान्यत्रतद्व्रातः॥यथानारसिंहे॥मध्याह्नेतु
समायुक्तेसंजीतबंधुकिनरइति॥॥इतिनिर्णयसिंधुजयंतीनि
यः॥वैशाखेधवलेपक्षेरोहिण्यांद्वादशीसंगेकुर्यात्॥तदुक्तंनारदीये॥
वैशाखेविप्रमुख्येयोधर्मश्रीयेप्रयच्छति॥केनकोदंडकं
पत्रैश्चामरादिभिरूपितं॥दिव्यान्नपायसःपूर्णसनरःस्व

॥२२॥

॥२२॥

स्नाग्भवेत्॥ततंवामोचयेद्यस्तुसनरःसुखमेधते॥संक्षे
वायुपुराणे॥शीतक्षोदकदध्यन्नंसुवर्णघटसंयुतं॥अस्मद्
दानासकलंदीयतेकलशोमया॥प्रीयतेधर्मराजायपूर्णाःस
न्तुमनोरथाः॥वैशाख्यांपौर्णमास्यांचकार्तिक्यांचहलेतथा॥
द्वादशंगेचयःकुर्यात्सप्राप्नोतीप्सितंफलं॥तस्मिन्नवस्थलमं
डलेसंद्वादशदलंलिखेद्योगिनीमहोत्सवंकुर्यात्॥तथा॥तस्यामा
वास्यायांभावुकपूजनंकार्यं॥शुक्लेकापूजनंकुर्यादमायांद्वादशे
खवौ॥तस्मिन्व्रतेसंस्पृष्टिर्नवैदितिमयंविना॥साचतुर्दशी
योगिनीपूजायारात्रिव्यापिनीपूर्वविद्धाकार्यापरेह्यादिवच
नबलात्॥इतिवैशाखः॥॥इदानीज्येष्ठतिथयः॥तत्रादौ
सितद्वितीयांमोजुरेद्भ्रातृद्वितीया॥तस्यांरात्रौस्नाट
पूर्वोक्तेस्नानीराज्यभगिन्यास्वगृहेभ्रातरंभोज्यः॥अस्यां
स्नाट्द्वितीयायांभोजयेद्भ्रातरंस्वसाइतिस्कांदोक्तेः॥प्र

तिपक्षद्वितीयास्यादियानासापूर्वविद्धायाह्याः॥तत्रैवशु
क्लदशमीदशापापहरास्मृता॥ज्येष्ठस्यशुक्लदशमीहस्तांगार
कसंयुतारविकंत्रिविधंचैववारुणंचतुर्विधं॥मानसंत्रि
विधंचैवदशापापविनाशिनी॥भागीरथ्यादितीर्थेषुस्नानाद्यु
चरतोनृणां॥हरयदशविधंतस्माद्दशहरास्मृता॥मातंडः॥
यांक्वचित्सरितंप्राप्यदशादशतिलोदकं॥हरतेदशापापानि
तस्माद्दशहरास्मृता॥कोर्मेज्येष्ठस्यशुक्लदशमीभूर्वसोम॥ ॥२३॥
दिनेयदि॥प्रोक्तहस्तसंयुक्तासिद्धिदाहरास्मृता॥
तस्यांस्नानादितीर्थेषुदशापापहरंस्मृतं॥वराहपुराणे॥
दशमीशुक्लपक्षेचज्येष्ठमासिकुजेहनि॥अवतीर्णव
तीगंगावीहस्तेर्क्षचसंयुता॥हरतेदशपापानितस्माद्दश ॥२४॥
हरातुसा॥अदत्तानामुपादानेहिंसायाचैवविधानतः॥प
रदाराभिगमनंकायिकंत्रिविधंस्मृतं॥पारुष्यमपवादंच

पैशुन्यंचापिसर्वज्ञः॥असंबद्धप्रलापश्चवाचिकंस्याच्चतुर्वि
धं॥परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं॥वितथाभिनिवे
शश्चमानसंत्रिविधंस्मृतं॥विशेषांतरकाशीखंडे॥ज्येष्ठमा
सिसितेपक्षेदशमीबुधहस्तयोः॥गंगानेदेव्यतीपातेकन्या
चंद्रेवृषरवौ॥एभिस्तुदशभिर्योगैर्हरतिपापानिदशा॥तस्मा
द्दशहराप्रोक्तागंगाजन्मदिनःस्मृतः॥अस्यांस्नानंतुतज्जसंग
मायांबहुपुण्यदं॥ज्येष्ठशुक्लप्रतिपदारभ्यगंगाजन्ममहोत्सवः
कुर्यात्॥॥अथवटसावित्रीव्रतनिर्णयः॥ज्येष्ठेपौर्णमास्यां
सावित्रीव्रतंकुर्यात्॥तदुक्तंस्कांदेभविष्ये॥ज्येष्ठमासिसि
तेपक्षेद्वादश्यांरजनीमुखे॥उपक्रम्यव्रतंत्रिरात्रमुद्दिश्य
दिवारात्रिस्थितामेवेतिव्रतोपसंहृतं॥ज्येष्ठमासितपः
क्षेपौर्णमास्यांतथाव्रतं॥चीर्णंपुरामहाभागस्त्रीकृतंतेमया

रूपेति॥दक्षिणासाश्वेतदेवाधियते॥एतद्व्रतमावास्यायामप्यु
क्तंनिर्णयामृतेभविष्ये॥अमायांचयजेद्देवंवटमूलेमहासती
त्रिरात्रोपोषितानारीविधिनानेनपूजयेत्॥अशक्तौतुत्रयोदश्यां
नक्तंकुर्याज्जितेंद्रिया॥अयाचितंचतुर्दश्यांअमायांसमुपो
षणं॥एतत्पौर्णमासीआद्रीयते॥अत्रपूर्णिमामावास्यपूर्वविद्धे
ग्राह्ये॥मूलविद्धेनकर्तव्यंदर्शपूर्णेकदाचन॥वर्जयित्वामुनिश्रे
ष्ठसावित्रीव्रतमुत्तममितिब्रह्मवैवर्तस्मरणात्॥स्त्रीदेषि॥पू
र्वविद्धेसिनीवालीनतुत्रव्रतंचरेत्॥वर्जयित्वानुसावित्रीव्र
तंत्रिरिवब्राह्मनेति॥यदासूर्योदयाघटिकाचतुर्दशीतदा
परामुह्यते॥पूर्वविद्धेवसावित्रीव्रतेपंचदशीतिथिः॥ना
ह्योदयेमूलस्यसुश्वेतस्यपरतोनीतिमाधवः॥वस्तुत
स्तु॥मूलोदयेनाडीत्रिदूषयेत्परतस्तिथिमियस्यव्रतं

॥२४॥

॥२४॥

तरेसावित्र्याव्रतं॥विशेषतःप्रतिपूर्वविद्धाविधायत्नवर्जं
नतर॥नेंसाबोधादूर्ध्वंनाडीवेधेपिपूर्ववेद्ययंपंथाःसाधु॥अत्र
पौर्णिमारोधनेवयंत्रिरात्रिसंपत्तिर्भवतिसत्यात्रयोदशा
दिग्राह्यं॥तस्याःप्रधानत्वात्॥अयंनिर्णयोमायामपिज्ञेयः॥
पारणंतुपौर्णिमांतेकार्यं॥अत्रस्त्रीव्रतेषुविशेषःपरिभाषायां
मुक्तः॥अथविशेषमविष्येगृहीत्वावालुकांपात्रेप्रस्थमात्रं
युधिष्ठिर॥ततोवस्त्रमयेपात्रेवस्त्रयुग्मेनवेष्टिते॥सावि
त्रीप्रतिमांकुर्यात्सोवलीवापिमृन्मयीं॥साद्वैसप्तव्रतासाध्वी
फलैर्नैवेद्यदीपकैः॥रक्तसूत्रेणशुभ्रेणकुंकुमेनसरेणु
पूजयेदितिशेषः॥रजनीहरिद्रांकेनसूत्रंसौभाग्यतंतुः॥स
विधानंचापिवाचयित्वाद्विजोत्तमैः॥रात्रौजागर
णंकृत्वाप्रभातेविमलेततः॥तामपिब्रह्मलोदकाप्लिपत्य

पमापयेत्॥मंत्रस्तु॥सावित्रीयमयादत्तासदिरण्यामहासखी॥
ब्रह्मणःप्रीतनार्थायकृष्णेवप्रतिगृह्यतां॥अनेनानेनराजेंद्र
विधयंनाप्नुयुःक्वचित्॥ज्येष्ठपौर्णिमास्यांविशेषः॥॥अ
दित्यपुराणे॥ज्येष्ठमासितिलान्मृद्याहोर्णिमायांविशेषतः॥
अभ्यंगमध्यस्थयसुप्तंनमाप्नोतिनसंशयः॥विष्णुरपि॥ज्ये
ष्ठेपूर्णायुताचेस्यात्तस्यांछत्रोपानद्दानेननरोनराधिपयम
यातिति॥॥॥दर्शेमन्वादिरपि॥सापोवाल्हीकीग्राह्यविशेषस्त
त्रैवोक्तं॥तथाऽपरार्केवामनपुराणे॥उदकुंभानुदानेतुताल
वृंतंचचंदनं॥त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासिति॥॥ ॥२५॥
इतिवटसावित्रीनिर्णयः॥॥॥इतिज्येष्ठतिथयः॥॥अथाषा
ढतिथयोनिर्णीयंते॥आषाढशुक्लद्वादश्यामनुराधायांवा॥ग
तेष्वयोगनक्षत्रभागेषुतेप्रथमभागेयोगरहितायांपारणंकुर्या
तु॥अस्यामेवविष्णोःशयनोत्सवः॥चातुर्मास्यव्रतारंभश्चैका

दश्यांद्वादश्यांवाकार्यः॥आषाढीपौर्णिमासीकोकिलाव्रते
सायान्हव्यापिनीग्राह्या॥अस्यामेवव्यासपूजोक्ता॥तत्रत्रिमुहू
र्तीचेयसराग्राह्या॥पद्मविष्णौ॥श्रावणेवर्तयेच्छाकंदधिभाद्रपदे
दत्यजा॥दुग्धमाश्वयुजेमासिकार्तिकेद्विदलंत्यजेत्॥द्विदलंत
णंतु॥माषमुद्गमसुराश्चणकाश्चकुलित्थकाः॥निष्पावाराज
माषाश्चआषाढेद्विदलंस्मृतं॥बीजमेवसमुद्भूतंद्विदलं
चाकुरंविना॥दृश्यतेयस्यसस्येषुद्विदलंतन्निगद्यतइति॥द्वि
दलोत्पत्तिर्यस्यस्यात्तंतदेववर्जयेदित्याहुः॥॥इत्याषाढः॥
अथश्रावणतिथयः॥॥श्रावणशुक्लचतुर्थ्यांअविवाहितकु
मारकुमारीभिश्चैकविंशतिग्रंथियुतःसूत्रस्योगणेशःपूज्यः॥
अत्रपूर्वेद्युर्मध्याह्नव्याप्तावेपरेद्युस्त्रिमुहूर्तोचेत्सरा॥अन्य
थापूर्वा॥नागश्चतुर्थीमध्याह्नव्यापिन्येवोपोषणादौ॥दिनद्व

येतथातेतदभावेवापूरेव॥ ॥अथनागपंचमीनिर्णयः॥ भ
विष्ये॥शुक्लपक्षेथवीपूर्णेपंचम्यांश्रावणस्यतुवरस्योभयते
लेख्यागोमयेनविषोल्बणाः॥पूजयेद्दधिदूर्वाकुरैःकुशैः॥संस्नाप्यपयसासम्यग्गंधपुष्पोपहारकैः॥ब्रा
ह्मणान्भोजयेद्भक्त्याव्रतंकुर्वीतमत्कृतः॥प्रतिसंवत्सरंनिय
मेनैषासर्पैर्नभूयते॥षष्ठीयुक्तातुसाकार्यापंचमीनागपूजने॥ ॥२६॥
चतुर्थीसहितावेवकर्तव्यानकदाचन॥नभसःपंचमीशुक्ला
त्रिमुहूर्तायदिसापरा॥ग्राह्याव्रतेपूजनेचैवकर्मकेसदान्य
ति॥तदेवोक्तंविषेरोषाद्धरे॥नभसःपंचमीशुक्लात्रिमुहू ॥२६॥
र्तासापरान्विता॥आसायंसातिथिर्ग्राह्यास्नानदानव्रतादिने॥
एषैवमेवाषाढेकार्तिकेमार्गशीर्षमासेष्वपिशुक्लपंचम्यांनाग
पूजनंकार्यं॥क्वचिद्द्वितीयाचतुर्थ्यामपिनागपूजनंकुर्वंति॥सा

चमीयुक्तैतेति॥उर्जेशुक्लचतुर्थीयापरयुक्तासुखप्रदा॥प्रणि
नःपूजयेतत्रप्रसीदंतिफणीश्वराः॥एवंसतिउर्जशुक्लचतुर्थीपंचमी
विद्धा॥तद्युक्तिरिक्तनागपूजनेचतुर्थीसर्वत्रपरविद्धातिसिद्धांतः॥
अतोत्तरविद्धेपंचम्यांनागपूजनमुक्तं॥नतूपवासः॥येषांकुले
मौक्तोपवासस्तेश्चतुर्थ्यांयुक्तेपंचम्यामुपोष्यषष्ठ्यांतुपरेयुर्नागपू
जनंकार्यंएतद्विषयपूर्वविद्धपंचमीप्रतिपादकवचनानिव्यवस्थि
तानीयानि॥पूजनादौतुषष्ठीयुक्तेतिसर्वसंमतं॥नकश्चिद्दोषः॥
नागकुलेषुविषो॥वासुकिस्तक्षकश्चैवकालीयश्चैवमद्रकः॥ऐ
रावतोधृतराष्ट्रःकर्कोटकधनंजयौ॥एतेप्रयच्छंतुभयंप्राणिनां
मर्चिताःसदा॥॥इतिनागपंचमीनिर्णयः॥तथैवात्रशुक्लचतु
र्दशी॥पवित्रारोपणेदेवाःप्रयच्छंतिसमीहितं॥कालादर्शे॥भा
पदांतचतुर्दश्यांनभस्यनभसोस्यवा॥अष्टम्यांचचतुर्दश्यां
पक्षयोरुभयोरपि॥पवित्रारोपणंकार्यंनतुकालांतरेहितमिति॥

आषाढोनद्वयेनैवपौर्णिमीतोमासोविवक्षितः॥आषाढशुक्लचतुर्दश्योमियर्थः॥मोहचूलोत्तरे॥आषाढस्यसितेदृष्टाश्रवणास्यसितासितैतिहृयमपिचतुर्दशीपूर्वविद्धाग्राह्या॥अस्यानिर्णयस्तुदमनकचतुर्दशीवज्ज्ञातव्यः॥श्रावणशुक्लचतुर्दशीकुलधर्मपवित्रारोपणादौपूर्वैवसायंकालेव्यापिनीग्राह्या॥तथाचैवश्रवणर्क्षंउपाकर्मकुर्यात्॥तत्रधनिष्टायुतेःश्रवणाग्राह्यः॥उत्तराषाढयुक्तोनिषिद्धः॥पूर्वेद्युरुत्तराषाढोयोगपरेद्युरेवंश्रवणाभावेघटिकाद्वयन्यूनेहस्तयुक्तेपंचम्यादौकार्यं॥तथैवसंक्रांतिग्रहणगुरुशुक्रास्तादावधिकमासेनकार्यं॥यद्यसंक्रांतिगुरुशुक्रास्तादोनूतनब्रह्मचारिणामेवपंचम्यादौअन्येषामद्वारात्रेग्रहणादौश्रवणयुतेएषकार्यं॥तत्तरीयाद्वयव्याप्यन्यपौर्णिमास्यांकुर्युः॥कालयन्नांतुदिनद्वयपूर्वव्याप्योएकदेशस्पर्शेवापूर्वेतिरुमाद्रिः॥निर्णयामृते

॥२७॥

॥२७॥

सुयजुःशाखिनामौदयिकपरशुक्लानूनातद्यजुःशाखिनामित्तितैतिरीयपरं॥रामोक्तेनुक्तेनुपूर्वौग्राह्येयुक्तं॥अस्यांस्नानमादौतैलाभ्यंगंविधायपश्चान्नद्यादौस्नातव्यं॥ननुनस्नायादुत्सवेनीतेमांगल्यंविनिवर्तेचेत्यनुव्रज्यसुहृद्भिर्धूपयित्वेष्टदेवतांतथा॥नाप्नोतिभूषितस्तुष्टःपोषितोयातिलक्ष्मीकः॥प्रियंवंधुमनुव्रज्यनस्नायात्तत्रमंगलं॥इत्यादिबकुरोक्तसङ्गवात्॥कार्यंमांगल्यकंस्नानंतत्रतत्रयंबहिःस्नायादित्युक्तं॥इहत्राह॥रागस्नानविषयतादृष्टिपरत्वेस्नानेनिषेधाप्रवृत्तेः॥विधिवेमेषविक्रांत्यादिप्रसंगादलभ्ययोगपुत्रजन्मवत्॥अतोनविरोधः॥ननुअत्राभ्यंगः॥कर्तव्यइतिविधिर्नास्ति॥मैवं॥मलापकर्षस्नानांगपूर्वोभ्यंगःकर्तव्यएव॥अकरणेप्रत्यवायस्मरणात्॥एवंपरिशिष्टे॥तैलाभ्यंगंविधायादौनद्यादौस्नानमाचरेत्॥रवीन्दुभौमवारेषुतथासंक्रांतिवासरे॥नदुष्टंकारिकायां॥तैलाभ्यंगमकृत्वायःश्रवणीकर्मसमारभेत॥एत्यतेनरकेघोरेयावदाभूतसंप्लवं॥

नविष्येपि॥ श्रावण्यांबलिराज्येचवसंतासमुदयेतथा॥तेलाभ्यंगम्
कुर्वीलानरकंप्रतिपद्यते॥अभ्यंगकारणेदोषश्रवणात्॥अतोभ्य
गंविधायैवश्रावणीकार्या॥अस्यावश्यंगोमूत्रस्थयेव॥नब्रह्म
णा॥श्रावणपौर्णिमासीकृष्णधर्मपवित्रारोपणादौपूर्ववत्॥अस्या
मभ्यंगोनिषेधः॥अस्यामेवमद्वारहितायांरक्षाबंधनंकार्यं॥श्रवण
कर्मण्यस्तमयेयोगीनीग्राह्या॥खंडरोषपूर्वेलिकुर्यात्॥अथतत्रैव
खलपक्षेसंकष्टचतुर्थीमुख्या॥तदुक्तंस्कांदे॥श्रवणेबहुलेपक्षे
चतुर्थ्यांचविधूदये॥तस्मिन्दिनेव्रतंकार्यंसंकष्टाख्यंसुरेश्वरि॥ ॥२८॥
प्रातःशुचिर्भवेत्सौम्योदंतधावनपूर्वकं॥निराहारोघटेवेशायाच्छु
द्धोदयोभवेत्॥अस्यांचंद्रोदयविधिसत्त्वान्यदिनेबहुकाले ॥२८॥
चंद्रोदयेव्यापिनीसाग्राह्या॥निशाव्रतेषुसाग्राह्याप्रदोषव्यापि
निनिशिः॥यस्मिन्कालेनुर्यंकमिति॥यत्रचोदयतिश्रेष्ठीसादिपूर्वे
कैवचनैःप्रायःपूर्वविद्धैव॥यतोबहुकालव्यापिनीतत्रामाव

योगःश्रयोनिशादिपुण्यतिथयश्रवणान्॥अपिचंद्रोदयवेलायांप्रा
सापूर्वविद्धैव॥अस्याविधिस्तत्कल्पोक्तोज्ञेयः॥तथाचैवलक्ष्माष्टमी॥
अथजन्माष्टमीनिर्णयः॥॥रोहिण्यामर्द्धरात्रेचयदालक्ष्माष्टमीभवेत्॥
तस्यामभ्यर्चनंशौरेर्हरिपापंत्रिजन्मजम्॥यदिनाब्धेःरोहिण्यष्ट
म्यर्द्धरात्रेयोगस्यप्राप्तिस्तिदिनद्वयेकुर्द्धरात्रेरोहिण्यष्टमीयोगा
सिनविद्यतेवातदा॥वह्नीनीयाप्रयत्नेनसप्तमीसंयुताष्टमी॥ब्रह्म
वैवर्तवचनात्॥परेवेयाह॥रोहिण्यासहितानिशीथसमयेवायो
नवासंस्पृशतोसाष्टमुत्तरायैंगास्तदोपवसेनेति॥यायांगछे
न्॥यदापूर्वदिनेऽर्धरात्रादूर्ध्वंअष्टमीप्रवृत्तादिनीयेनक्षिघटि
कामात्रंमुहूर्तंवारोहिणीस्यात्तदोत्तरेयाह॥अर्धोर्ध्वंनिशीयदु
वेत्॥अष्टम्यांचनिशीयत्रदिवसनाडीमुहूर्तंदिवाप्यपरत्र
तरेति॥नाडीमियत्रकालार्धनोरितिद्वितीया॥तत्रैवस्कांदे॥सप्तमी
संयुताष्टम्यांमृताऋक्षेद्विजोत्तम॥प्राजापत्यद्वितीयेमुहूर्ते
द्वंभवेद्यदि॥तदाष्टम्यामिदंतत्यंप्रोक्तंव्यासादिभिःपुरेतिपक्षे॥

मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत्॥ किंपुनर्नवमीयुक्ता कुल
कोट्यादिदुःखमुक्तिदा॥ अथ मयुतांयैव स्मृता साव्रतेति॥ यदा अंया
द्वितीयैवनमयुतानक्षत्रयुक्तनपूर्वतिदा सांयव्रतेस्मृता॥ तथा च
विष्णुरहस्ये॥ प्राजापत्यर्क्षसंयुक्ता लक्षानाम सिताष्टमी॥ मु
हूर्तेनापिलक्ष्यते सोपोष्यासामहाफलेति॥ तस्यामेवदारुयोगेप्रा
स्तेमो॥ सापिस्याद्रुधसोमयुग्यदितदातीपूर्वैवास्ताइति॥ तथा
पद्मपुराणे॥ प्रेतयोनिगतानांतुव्रतंनाशितंनरैः॥ यैःकृता
वणेमासिअष्टमीरोहिणीयुता॥ किंपुनर्बुधवारेणसोमेनापि
एवौघतः॥ किंपुनर्नवमीयुक्ता कुलकोट्यस्तुमुक्तिदेति॥ उते
रविद्धामुक्तापूर्वविद्धामाह॥ अथयापूर्वैवर्क्षयुतानि॥ त्रीण्यमयु
तामासिकृष्णहेवाभवेत्॥ तांपूर्वांसमुपावसेदिति॥ याचपूर्व
दिनेएवार्द्धरात्रेमयुतातामपिपूर्वांमुपवसेत्॥ रोहिण्यामर्द्धरात्र
चेयादिवाकेवलंस्यात्सापरैवविधानतः॥ यावद्दिनद्वयंरोहि

BHAU DAJI

णीरहितातामपिपूर्वांमुपवसेत्॥ लक्षपक्षेष्टमी चैवलक्षपक्षेच
तुर्दशी॥ पूर्वविद्धैवर्तेव्यापरविद्धानकर्हिचित्॥ यादिवाक्यवशेदिय
र्थः॥ नक्षत्रनादेःस्थूलानयनंसूक्ष्मानयनंज्योतिःशास्त्रेप्रसिद्धं॥
तत्रस्थूलानयनंव्यवहारप्रसिद्धमितितदेवाग्रयणीयमित्याह॥ इह
यथास्थूलेनमानेनयत्राग्रयेदिति॥ इहअस्मिन्शास्त्रेस्थूलेनयथा
गोमालिमादिनक्षत्रादिआग्रयेदियन्वयः॥ तथाचज्योतिःशास्त्रं॥
स्थूलेलक्षंमानयनंपदेतज्ज्योतिर्विदांतद्व्यवहारसिद्धं॥ सूक्ष्मंप्रवक्ष्य
यमुनिप्रतीतंविहाययात्रादिफलप्रसिद्धौ॥ तथाचस्मृतिसिंधौ॥
माद्रलक्षाष्टम्यांश्रीलक्ष्मीनाष्टमीव्रतंप्रकल्पितं॥ मासिमासिउपवासो
निशीथेलक्षपक्षजे॥ रात्रौनक्षत्रंरात्रिस्थंरोहिणीसंज्ञकंयो
गेस्मिन्वसुदेवाद्यैर्देवकीमासजीजनत्॥ भगवत्याश्चतत्रैवकीर्यत
सुमहोत्सवः॥ योस्मिन्नधितेष्टम्यांसिंहराशिगतेरवौ॥ दि
शुक्लेनभसांप्रायमेतत्॥ अतएवेदंलक्षांतमासाग्रिमप्रायेणस
श्रावणइति॥ प्रायेः॥ वस्तुतेसुदर्शनंतमासाग्रिमप्रायेणैवश्रावण

माद्रपदव्यपदेशः॥तत्र श्रवणेमुख्यः कल्पः॥भाद्रेनुकल्पः॥तथा
चवसिष्ठसंहितायां॥श्रावणेवानघ्वोस्ये रोहिणीसहितास्मी॥य
दाक्षानेरलेश्वासाजयंतीप्रकीर्तिता॥श्रावणेनभवेद्यागोनभस्य
नुभवेद्यदि॥तयोरभावेयोगस्यतस्मिन्वर्षेनसंभवइति॥अत्र
चश्रावणभाद्रपदयोर्दर्शपूर्णिमातत्प्रायेणवयोगोक्रियमाणे
श्रावणेवानघस्येवेतिविकल्पानुपपत्तिः॥वस्तुनिविकल्पसंभवात्
योगसंभवासंभवानुपपत्तिश्चापिमाधवस्यापिस्वरसः॥तस्मान्मा
सद्वयाभिप्रायेणवद्वंव्यपदेशइति॥तत्रकार्त्तीः॥सप्तमीतिथिर्ड ॥३०॥
येयारोहिणीयुक्तेश्रावणेवाष्टम्यांअर्द्धरात्रेदधःकलामात्रेणा
पिविद्धाजयंतीसंज्ञेयाह्या॥तदुक्तंविष्णुधर्मोत्तरे॥॥रोहिणीसहि
ताकृष्णाभाद्रेपदाष्टमी॥सप्तम्यामर्द्धरात्रेधःकलयापियदाभवे ॥३०॥
त्॥तत्रजातोजगन्नाथःकोस्तुमाहरिरच्युतः॥तमेवापवसेत्कालेतु
र्यांतत्रैवजागरं॥अर्द्धरात्रेतुयोगोयंतारापूदयसंतति॥नियत

सांशुचिःस्नातःपूजांतत्रप्रवर्त्तयेदिति॥अत्रहेमाद्रिः॥रोहिण्याम
र्द्धरात्रेचयदाक्षेसाष्टमीसंवेत्॥तस्यामभ्यर्चनंशौरेर्हंतिपापंत्रिज
न्मजमित्यादिभविष्यपुराणादिवाक्येनिशीथाष्टमीरोहिणीयो
गवातीमुख्या॥साचद्विविधा॥पूर्वविद्धातरविद्धाचेति॥तत्राद्यापि
विधा॥॥पूर्वेद्युरुदयत्रैकापिरोहिणीयुक्तानोनयत्ररोहिणीयुक्त
चेति॥साचसर्वापूर्ववोपोष्या॥आद्ये॥सुहृत्समप्यहोरात्रेयस्मिन्यु
क्तोहिलभ्यते॥अष्टमीरोहिणीरक्षंतीपुण्यासमुद्रावसेदितिविष्णु
रहस्यात्॥मध्यमे॥रोहिण्यामर्द्धरात्रेचेत्कृष्णभविष्यहाकथानु॥अन्य॥
त्रसप्तमीचेवलक्षपक्षेचनदृश्यते॥पूर्वविद्धावर्जनीयापरावि
द्धानुकल्पेचदिवापस्तंबवाक्यात्॥परापिचतुर्विधा॥उभयत्र
निशीथरोहिणीयुक्ता॥नोभयत्रनिशीथेरोहिणीयुक्ता॥परेद्यु
रुरोहिणीयुक्तेचेति॥साचसर्वापिपरैवोपोष्या॥प्रयत्नमष्टमीयु
क्तावर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी॥इतिब्रह्मवैवर्तात्

द्वतीये॥ सप्तमी संयुता ह्यष्टमी पूर्वा रविसंद्विजोत्तम॥ प्राजापत्यं हि
तिथे मुहूर्तार्धं क्वचिद्यदि॥ तदष्टम्यामिकं ज्ञेयं व्रतं व्यासादिभिः
परैः॥ स्तोदात्॥ मुहूर्तमपि संयुक्ता संपूर्णा साष्टमी भवेत्॥ किं
पुनर्नवमी युक्ता कुलकोद्या सुमुक्तिदा॥ इति पाद्मे॥ चतुर्थ्यां॥
उदये चाष्टमी किंचिन्नवमी सकला यदि॥ भवेत्तत्र बुधैः संयुक्ता प्रा
जापत्यर्क्षसंयुता॥ अपि वर्षशतेनापि लभ्यते वा नवा विभो॥ इति स्को
दात्॥ अनंतमहास्तु तोवाउ ग्नेयदा मनुः॥ यथा॥ शुद्धस
प्तमीरोहिणीयुता॥ ७॥ तद्धिता॥ शुद्धन्यूनारोहिणीसंयुता॥ त ॥३७॥
द्धिता४॥ शुद्धाधिकारोहिणीरहिता५॥ सा च परेद्युरोहिणीस ॥३७॥
हिता६॥ पूर्वेद्युः रोहिणीसहिता७॥ उदयदिनेरोहिणीसहिता८॥
एवं विद्धापि देवं ग्नेयदा मः॥ तत्र शुद्धाधिकाविद्धाधिकाचे
न तस्मिन्नेवदिनेसनक्षत्रा चेत्तदा परेव॥ मुहूर्तमप्यहोरात्रद्व ५ न

तिविस्तरः स्यात्॥ सेवोभयत्रसनक्षत्रासतीपरेद्युर्बुधवासोम
युताद्यतिविस्तरः स्यात्॥ सेवोभयत्रनक्षत्रासतीपरेद्युर्बुधसोमयु ६
क्ताचेपरेव॥ यदाकदाश्रावणमासिअष्टमीरोहिणीयुता॥ किंपुनर्बु
धवारेणसोमेनापिविशेषतः॥ किंपुनर्नवमीवेयुक्ताकुलकोद्यासुमुक्ति
दानिशाप्रात्॥ यदातिथिर्नक्षत्रंचेद्द्वयोभयत्रापरेद्युर्नक्षत्रयो
गस्तदापिपरेव॥ सत्रक्षापिनक्तव्यासप्तमीसंयुताष्टमीतिनिषेधा
त्॥ अन्याद्दादशापिपूर्वाएव॥ जन्माष्टमीरोहिणीवत्रिवरात्रिस्त
थैवच॥ पूर्वविद्धैवकर्तव्यातिथिर्यस्यांतेचपारणमित्यादिवचननिर्म
यादिति॥ अत्रमतद्वैधेयकंव्रतंतत्रवागम्यतेव्रतमेदाप्रतिपाद ६ २
नात्॥ तत्रजयंतीव्रतमेव॥ तदपिकाम्यमेवयंनंतभट्टाः॥ नित्यका
काम्यमितिहेमाद्रिः॥ माधवस्तुजन्माष्टमीव्रताज्जयंतीव्रतस्यप्रा
दमुख्यापूर्वस्यनित्यत्वमुत्तरस्यनित्यकाम्यत्वमाह॥ तथा॥ ॥ जन्मा द्य ५१२
ष्टमीजयंतीव्रतयोर्मध्येदशमेदंडेनैदहतिपूर्वः पक्षः॥ रूपभे
दाभावात्॥ उपवासजागरणादिव्रतस्यरूपंयत्रोयागस्यद्रव्य

दिवतेनचूद्वयोरपितुल्यमेवनत्रयेस्पष्टमिष्यते॥ग्राथरूपाणि
दिपिनियेकाम्यताप्योमेदःस्यात्निशाहिजन्माष्टमीअकरणेदो
षश्रवणात्॥यथास्कंदे॥॥येनकुर्वंतिजानंतःसल्लाजन्माष्ट
मीव्रतं॥तेषवंतिनरप्राज्ञान्यायोलोकान्ननरयादि॥जयंती
नुकाम्यापूलोक्तं॥तथातत्रैव॥मनुजायेकुरुतांजयंतीमुक्तयेनघ॥
धर्ममर्थंचकामंचमोक्षंचमुनिपुंगव॥ददातिवांछितानर्थान्नान
येनातिदुर्लभमितिजदपिन॥रूपतयेगुणफलेनापिजयंत्याः
फलविशेषापपत्तेः॥गोदोहनेनपशुकामस्यप्रलयेइंद्रियस्य ॥२२॥
जुहुयादितिवत्॥जयंत्याष्टमीरोहिणीयोगरूपतयोकालविशे
षस्तुलवैसंनवात्॥तथाविष्णुरहस्ये॥॥अष्टमीसलपक्षस्य ॥२२॥
रोहिणीरक्षसंयुता॥कवेष्वेषपदमासिजयंतीनामसाप्रोक्तेति
तस्मान्नव्रतंकदाप्यतउच्यते॥नामरूपनिमितोभुक्तिमुक्तिप्रद
मेदतः॥जन्माष्टमीजयंत्योर्हिभेदोनिर्दोषभेदतः॥तथाहि॥

उक्तवाक्ययोर्जन्माष्टमीजयंतीनामभेदादशेषज्योतिरशेषविष्णो
तिरशेषसर्वेज्योतिरित्यत्रैवकर्मभेदः॥तथाउपवासमात्रंजन्माष्टमी
व्रतस्वरूपं॥उक्तिवाक्येतावन्मात्रप्रत्ययात्॥तथाकेवलेनोपवासेन
तस्मिंजन्मदिनेमम॥ग्रातजन्मकृतात्पापान्मुच्यतेनात्रसंशयः
ति॥अतएवतावन्मात्रकरणएवप्रत्ययोनेतरांशदानाद्यपेक्षा
वाक्यात्॥गृध्रमांसंवराहंचशशंचैवनचमुनिसत्तम॥मांसंवापिपदांशु
क्लेजन्माष्टमीदिनेइति॥जयंतीस्वरूपंतूपवासजागरणपूजा
दि॥यथानारदीयसंहितायां॥॥उपोष्यजन्मविधानंकुर्याज्जागर
णंमुदा॥कविधातरेमासिमाद्रपदेसप्तमीनिशीथेकलपक्षगेः॥
ग्रष्टमांकेदृषराज्ञिस्येत्रक्षेरोहिणिसंज्ञके॥योगेस्मिन्वसुदेवाद्वि
देवकीमामजीजगत्॥तस्मान्मांपूजयेत्तत्रशुचिसम्यगुपोषितः॥ब्रह्म
णान्मोजयेद्भक्तातोदद्याद्दक्षिणामिमांदि॥तस्मादमिष्टकोरु
णन्यायेनात्रोपरूपमेदाद्भेदः॥तथाजन्माष्टमीव्रतंतिथिरेवनिमि
त्तंसमाख्याबलात्॥जयंतिव्रतंतुरोहिणीयोगःपूर्वोक्तेविकुरुहस्

वाक्यात्। यद्यप्यविद्धायांतुसप्तम्यां जातोदेवकिनंदनइतिब्रह्मवै
र्त्तादन्नपिरोहिणीयोगेनिमित्तंतथापिसमारब्धायातिथिमात्रस्यैवप्रा
थान्यमन्यथाबारयोगादिष्वतिप्रसंगात्॥यद्यपिनेदंस्पष्टंतत्रभेदप्रमा
णंतथापिसंज्ञाप्रमाणोपोद्बलकमित्युपन्यस्तं॥तथाशुद्धनिशाजन्माष्ट
मीयेनकुर्वंतिजानंतइत्यादिस्कांदादिवाक्यात्॥जयंतीचनिशाकाम्या॥
शुद्धाभेननुयासापूर्वाविद्धाकलासमाजने॥तस्मात्पंचलवंमंतेनुहंतीजन्म
तीविमुखोनरइत्यादिस्कांदादिवाक्यैर्निशायाअपिमहाजयायमि
त्यादिपूर्वविद्धवाक्यैकाम्यत्वात्॥तस्माज्जन्माष्टमीजयंतीचनिशावरा
त्रिव्रतएवचेतिगुरुवाक्यैजन्माष्टमीजयंत्योःपृथक्निर्देशाच्चेद
इतिसिद्धोभेदः॥ननुभेदाभेदयोःकोनुष्ठानेविनाघइतिचेत्॥म
तल्विरोधः॥अभेदेदृष्ट्यारोहिण्ययोगेजयंतीव्रतलोपवज्जन्माष्ट
मीव्रतमपिलुप्येत॥भेदेतुजन्माष्टमीव्रतेस्यादेवेति॥नन्वेवंयत्रो
नद्वयष्टमीरोहिणीतुपरेह्यु रेव॥तत्रपरेद्युःपूर्वव्रतपारणान्तर

व्रतोपवासयोर्विरोधइतिचेन्न॥आघ्राणोदकपानादिना॥
पिपारणसंभवात्॥नचोपवासद्वयमेवंदोषयोःसमत्वेकेवल
तिथेरपेक्षणीयत्वात्॥नित्यकाम्यानुष्ठानेननित्यसिद्धेश्चेति॥त
दिवंसिद्धेव्रतभेदयोगेदेनतयोर्व्यवस्थाचिंतिता॥॥हेमाद्रि
व्रतखंडेवह्निपुराणे॥त्रेतायांद्वापरंचैवरामकृष्णयुगेपुरा॥रो
हिणीसहितेचैवविद्धेःसमुपोषितं॥वियोगेपारणंचक्रुर्मुनयो
ब्रह्मवादिनः॥सांयोगिकेव्रतेप्राप्तेयत्रकापिवियुज्यते॥नतपारणंतु
र्योदेवंब्रह्मविदोविदुः॥अतःपरंमहीपालसंप्राप्तेनाचसत्फले॥ज
न्मनोवासुदेवस्यपवित्रंव्रतमुत्तमं॥अनेनचपुराकल्पेरूपेणा
र्थवादेनजयंतीव्रतंलक्षणादियुगत्रयेकर्त्तव्यमितिरत्नाकरे॥अन्य
त्रप्रतिपादनंवयंपश्यामः॥अतःपरमिदानींजन्माष्टमीव्रत
मेवकालोविधीयतइतिव्यवस्थासिद्धिः॥तत्रतिथिर्निर्णेतव्या॥सा
चशुद्धाविद्धाच॥॥शुद्धाअहोरात्रव्यापिनी॥विद्धाचनिशीथोभ
यस्पर्शियुक्तेति॥अष्टमीनिशिवर्त्तिष्यद्घटिकाद्वयरात्रादर्वाग्यदि॥दृश्य
तेघटिकायासापूर्वविद्धाप्रकीर्त्तितेतिस्मरणात्॥शुद्धाविद्धाविधा॥

निशीथव्यापिनीतदुभयव्यापिनीयेति॥तत्रोभयत्रापिपूर्वैव॥दिनाव
यदिवारात्रौनास्तिचेद्रोहिणीकला॥रात्रियुक्तंप्रकुर्वीतविशेषेण
दुसंयुतामितिश्रवणात्॥अन्यानुकल्पःरात्रियुक्तमितिश्रवणात्
विद्धाचतुर्विधा॥पूर्वेद्युरेवनिशीथव्यापिनीपरेद्युरेव--उभ
यत्रनोभयत्रचेति॥तत्रैकयोस्तोसैवविशेषेदुसंयुक्तमितिस्मृते
न॥अन्ययोस्तुपरैव॥संकल्पकालमारभ्यसतीत्॥नचलक्षदेव
ष्टमीचैवसदानेनपूर्वाप्रसंगः॥तस्यापूर्वविधविषयत्वात्॥अन्यथाऽ
तीतरेष्वपिनिशीथवेधप्रसंगः॥इतिजन्माष्टमीनिर्णयः॥॥॥अ
थजयंतीनिर्णयः॥॥॥सापिचतुर्द्धा॥शुद्धाविद्धाशुद्धाशीधैकावि
द्धाधिकाचेति॥अत्रापिशुद्धविद्धेपूर्वैवैव॥तयोश्चयास्त्रिविधाः॥
संपूर्णानिशीथेयत्रकुत्रापिचेति॥एतेषुषट्स्वपिभेदेषुदिनांतरे
योगाभावेपूर्वैव॥यथाहवसिष्ठः॥अर्द्धरात्रेतुयायोगोऽसंपूर्णो
भवेद्यदि॥अर्द्धरात्रेचयोयोगःपरतोरात्रिसंयुतः॥योगोरात्रौ
स्वल्पश्चप्रशस्यतारतम्यंज्ञेयं॥यथायत्रकुत्रापियोगःप्रशस्तः॥
निशीथप्रशस्ततरः॥संपूर्णेप्रशस्ततमइति॥शुद्धाधिका

पित्रिविधा॥पूर्वेद्युरेवरोहिणीयुक्तापरेद्युरेवउभयत्रचेति॥त
त्रैकत्रयोगेसैवकोतरामावात्॥अंशपक्षेतुपूर्वैव॥गुणाधि
क्यात्॥यथा॥त्रिविधस्तावदुभयत्रतिथिनक्षत्रयोगः॥पूर्वेद्युरद
यासकृत्प्रवृत्तयास्तिथिनक्षत्रयोर्द्वयोःपरेद्युरनुवृत्तिः॥पूर्वेद्यु
